# प्रथम आवर्त मूल्यांकन - 2017-18

## कक्षा - सप्तमी

**अवधिः - सार्धैकहोरापर्यन्तम्   विषयः - संस्कृतम्   पूर्णांकाः - ४०**

**नाम** ........................................................ **वर्ग** ..............................................................
**अनुक्रमांक** ............................................. **दिनांक** ........................................................
**हस्ताक्षर निरीक्षक** ................................ **जाँचकर्ता** ....................................................
**प्राप्तांक** ........................................................

**खण्ड - क - अपठितम् अवबोधनम्**

**क - १ - अधोलिखितम् अनुच्छेदं पठित्वा तस्याधः प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत - ६**

पितामही शयनकक्षे गच्छति। सा ईश्वरं स्मरति ।तत्पश्चात् सा शयनं करोति । प्रातः सा पंचवादने उत्तिष्ठति । सा स्नानं करोति । स्नानस्य पश्चात् सा देवस्य पूजनं करोति । सा भक्तिगानं गायति सा सूर्यं नमति । सा वदति - सूर्याय नमः । सूर्यः संसाराय जीवनं ददाति , अतः सूर्यः पूज्यः अस्ति ।

**१ - एकपदेन उत्तरत - २**

**क - पितामही कुत्र गच्छति ?**

(क)-शयनकक्षे (ख)-मन्दिरे (ग)-विद्यालये

उत्तरम् -------------------

**ख - सा कदा उत्तिष्ठति ?**

(क)-सप्तवादने (ख)- पंचवादने (ग)-त्रिवादने

उत्तरम् -------------------

**ग - सा कम् नमति ?**

(क) - सूर्यम् (ख) -चन्द्रम् (ग) -कृष्णम्

उत्तरम् -------------------

**घ - कः संसाराय जीवनं ददाति ?**

(क) - सूर्यः (ख)-चन्द्रः (ग)- रामः

उत्तरम् -------------------

**२ - पूर्णवाक्येन उत्तरत - ४**

**क - पितामही कदा पूजनं करोति ?**

उत्तरम् -----------------------------------------------------।

**ख -सूर्यः किमर्थं पूज्यः अस्ति ?**

उत्तरम् ---------------------------------------------------------------------------------------------------------।

**खण्ड - ख - रचनात्मकं लेखनम् - ८**

**ख - १ - मंजूषातः पदानि चित्वा कथां पूरयत - ५**

(नासिकायामेव, वारंवारम्, खड्गेन, दूरम्, मक्षिका, उपाविशत्, छिन्ना, सुप्तः, प्रियः)

पुरा एकस्य नृपस्य एकः -----------वानरः आसीत् । एकदा नृपः -----------आसीत् ।वानरः -------------- तम् अवीजयत् ।तदैव एका
---------------- नृपस्य नासिकायाम् ---------------- ।यद्यपि वानरः -----------------व्यजनेन तां निवारयति स्म तथापि सा पुनः पुनः नृपस्य ---------------------- उपविशति स्म । अन्ते सः मक्षिकां हन्तुं ------------- प्रहारम् अकरोत् । मक्षिका तु उड्डीय -------------
गता , किन्तु खड्गप्रहारेण नृपस्य नासिका ----------------अभवत् । अत एवोच्यते -मूर्खजनैः सह मित्रता नोचिता ।

**ख - २ -चित्रं दृष्ट्वा मंजूषातः पदानि च प्रयुज्य वाक्यानि रचयत - ३**

कृषकः कृषकौ एते धान्यम् एषः कृषकाः
एतौ क्षेत्रम् कर्षति कुरुतः खननकार्यम् रोपयन्ति

उत्तराणि -

---------------------------------------------------------------------------|
---------------------------------------------------------------------------|
---------------------------------------------------------------------------|

**खण्ड - ग - अनुप्रयुक्त व्याकरणम् - १२**

**ग - १ -मंजुषातः समानार्थकपदानि चित्वा लिखत - ४**

प्रसन्नतायाः, लब्ध्वा, शरीरस्य, दक्षाः

उत्तराणि -

प्राप्य --------------
कुशलाः --------------
हर्षस्य --------------
देहस्य --------------

**ग - २-विलोमपदानि योजयित्वा लिखत - ४**

| | |
|---|---|
| अधः | नीचैः |
| अन्तः | सुलभम् |
| उच्चैः | उपरि |
| दुर्लभम् | बहिः |

उत्तराणि

अधः --------------
अन्तः --------------
उच्चैः --------------
दुर्लभम् -------------

**ग - ३ -अधोलिखितपदेषु धातवः के सन्ति ? ४**

पदम् धातुः
करोति ---------

| | |
|---|---|
| पश्य | --------- |
| भवेत् | --------- |
| तिष्ठति | --------- |

## खण्ड - घ - पठितावबोधनम् -१४

**घ -१-अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** ४

अस्ति मगधदेशे फुल्लोत्पलनाम सरः । तत्र संकटविकटौ हंसौ निवसतः । कम्बुग्रीवनामकः तयोः मित्रम् एकः कूर्मः तत्रैव प्रतिवसति स्म । अथ एकदा धीवराः तत्र आगच्छन् । ते अकथयन् -"वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः।" एतत् श्रुत्वा कूर्मः अवदत् -मित्रे ! किं युवाभ्यां धीवराणां वार्ता श्रुता ?

**१ - एकपदेन उत्तरत -** २

**क - मगधदेशे किं नाम सरः अस्ति ?**

१ - फुल्लोत्पलनाम  २ - कमलनाम  ३ -पंकजनाम

उत्तरम् --------------------।

**ख - कूर्मस्य नाम किम् आसीत् ?**

१ - सुग्रीवः  २ - कम्बुग्रीवः  ३ - कुग्रीवः

उत्तरम् -------------------।

**ग - तत्र कौ निवसतः ?**

१ - संकटविकटौ  २ - रामलक्ष्मणौ  ३ -सूर्यचन्द्रौ

उत्तरम् --------------------।

**घ - एकदा तत्र के आगच्छन् ?**

१ - धीवराः  २ - शूकराः  ३ - कुक्कुराः

उत्तरम् --------------------।

**२ - पूर्णवाक्येन उत्तरत -** २

**धीवराः किम् अवदन् ?**

उत्तरम् ---------------------------------------------------------------------------------।

**घ - २- रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -** ३

**क - <u>सत्येन</u> वाति वायुः ।**

उत्तरम् ---------------------------------------------?

**ख - <u>वसुन्धरा</u> बहुरत्ना भवति ।**

उत्तरम् ----------------------------------------------?

**ग - <u>सद्भिः</u> मैत्रीं कुर्वीत ।**

उत्तरम् ----------------------------------------------?

**घ - ३-घटनाक्रमानुसारं वाक्यानि लिखत -** **४**

क)- कूर्मः हंसयोः सहायतया आकाशमार्गेण अगच्छत् ।

ख)- गोपालकाः अकथयन् - वयं पतितं कूर्मं खादिष्यामः ।

ग)- कूर्मः हंसौ च एकस्मिन् सरसि निवसन्ति स्म ।

घ)- केचन् धीवराः सरस्तीरे आगच्छन् ।

ङ)- कूर्मः अन्यत्र गन्तुम् इच्छति स्म ।

च)- लम्बमानं कूर्मं दृष्ट्वा गोपालकाः अधावन् ।

छ)- कूर्मः आकाशात् पतितः गोपालकैः मारितश्च ।

ज)- "वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः" इति धीवराः अकथयन् ।

**घ -४ -मंजूषातः अङ्कानां कृते पदानि चित्वा लिखत -** **३**

चत्वारिंशत् सप्तविंशतिः एकत्रिंशत् अष्टाविंशतिः

त्रिंशत् चतुर्विंशतिः

उत्तराणि -

२८ ---------------- ३० ------------------

२७ --------------- ४० ------------------

३१ --------------- २४ ------------------

---